॥ શ્રી લક્ષ્મ્યષ્ટકમ ॥

યસ્યાઃ કટાક્ષમાત્રેણ બ્રહ્મરુદ્રેંદ્રપૂર્વકાઃ ।
સુરાઃ સ્વીયપદાન્યાપુઃ સા લક્ષ્મીર્મે પ્રસીદતુ ॥ ૧ ॥

યાઽનાદિકાલતો મુક્તા સર્વદોષવિવર્જિતા ।
અનાદ્યનુગ્રહાદ્વિષ્ણોઃ સા લક્ષ્મીર્મે પ્રસીદતુ ॥ ૨ ॥

દેશતઃ કાલતશ્ચૈવ સમવ્યાપ્તા ચ તેન યા ।
તથાઽપ્યનુગુણા વિષ્ણોઃ સા લક્ષ્મીર્મે પ્રસીદતુ ॥ ૩ ॥

બ્રહ્માદિભ્યોઽધિકં પાત્રં કેશવાનુગ્રહસ્ય યા ।
જનની સર્વલોકાનાં સા લક્ષ્મીર્મે પ્રસીદતુ ॥ ૪ ॥

વિશ્વોત્પત્તિસ્થિતિલયા યસ્યા મંદકટાક્ષતઃ ।
ભવંતિ વલ્લભા વિષ્ણોઃ સા લક્ષ્મીર્મે પ્રસીદતુ ॥ ૫ ॥

યદુપાસનયા નિત્યં ભક્તિજ્ઞાનાદિકાન ગુણાન ।
સમાપ્નુવંતિ મુનયઃ સા લક્ષ્મીર્મે પ્રસીદતુ ॥ ૬ ॥

અનાલોચ્યાપિ યજ્જ્ઞાનમીશાદન્યત્ર સર્વદા ।
સમસ્તવસ્તુવિષયં સા લક્ષ્મીર્મે પ્રસીદતુ ॥ ૭ ॥

અભીષ્ટદાને ભકતાનાં કલ્પવૃક્ષાચિતા તુ યા ।
સા લક્ષ્મીર્મે દદાત્વિષ્ટં ઋજુસંઘસમર્ચિતા ॥ ૮ ॥

એતલ્લક્ષ્મ્યષ્ટકં પુણ્યં યઃ પઠેદ્ભક્તિમાન નરઃ ।
ભક્તિજ્ઞાનાદિ લભતે સર્વાન કામાનવાપ્નુયાત ॥ ૯ ॥

વૈષ્ણવેભ્યઃ પ્રદાતવ્યમેતત સ્તોત્રં પ્રયત્નતઃ ।
અવૈષ્ણવાય યો દદ્યાત મોહાત સ બ્રહ્મહા ભવેત ॥ ૧૦ ॥

॥ ઈતિ શ્રીશ્રીમુષ્ણાચાર્યકૃતં શ્રીલક્ષ્મ્યષ્ટકમ ॥

www.yousigma.com